ललितालालितः

परमहंसप्रिया - २६

(मूलं : भागवतम्)

निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसम् आलयं
मुहुरहो रसिका भुवि भावुकाः ॥३॥

(टीका : परमहंसप्रिया)

एवं तावत् **प्रथमश्लोकेन** शास्त्रार्थस्य परमपुरुषावयवत्वम् उक्तम् ।
द्वितीयश्लोकेन शास्त्रस्य परमपुरुषापेक्षसाधनत्वम् ।
'शास्त्रमेव परमपुरुषार्थ' - इति **तृतीयश्लोकेन** आह - **निगमेत्यादिना** ।

निगमो = वेदः ।
स एव **कल्पतरुः** । बहुशाखत्वात् , अशेषपुमर्थप्रदातृत्वात् च ।
तस्य **फलं** सारभूतम् ।

भागवतम् = असाधारण्येन भगवत्प्रतिपादकं पुराणम् ।

पुनः पुनर्वेदमालोच्य रचितत्वात् , तस्य वेदफलत्वम् ।
सर्व्ववेदार्थस्य रससङ्ग्रहभूतम् - इत्यर्थः ।

तथा च **वक्ष्यति -**

भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया।
तदध्यवस्यत् कूटस्थो रतिरात्मन् यतो भवेत्॥

- इति।

भगवद्भक्तेः सर्व्ववेदार्थसारत्वात् , तत्प्रतिपादकम् इदं सर्व्वतः सारभूतम्।

पिबत = संसारतापरूपपिपासोपशान्तये श्रवणपुटैः सर्व्वं हृद्गतं कुरुत।

हे **रसिकाः** = असाधारण्येन रसव्यवहर्त्तारः।

पुनः कीदृशाः।
भावुका = विभावानुभावाद्यर्थोपनयचतुराः।

भावका - इति**पाठेऽपि** स एवार्थः।

स्थायिभावमात्रवत्त्वेन रसिकत्वेऽपि , विभावाद्युपनयासामर्थ्ये सति स्वादो न स्यात्।
विभावाद्युपनयोऽपि स्थायिभावे असति व्यर्थः।
- इति विशेषणद्वयेन चातुर्य्यातिशयो ध्वन्यते।

एतादृशरसानास्वादे रसिकत्वं युष्माकं व्यर्थमेव स्यात् - इत्यर्थः।

फलस्य कथं पानम् - इति।

अत आह - **रसम्** - इति।
त्वगष्ट्यादिस्थानीयासारांशाभावात् , रसमात्ररूपत्वेन पानसम्भव - इत्यर्थः।

रसत्वेऽपि माधुर्य्यातिशया(/यत्वा)भावात् अनास्वाद्यत्वं फलस्य - इति।

अत आह - **अमृतद्रवसंयुतम्** - इति।
अमृतं = मोक्षः।
तस्य **द्रवः** = गतिः = प्राप्तिः। **तत्सहितम्**।
- इति परमार्थकल्पतरुफलस्य अमृतस्वादुत्वेन प्रसिद्धत्वात् , **अमृतद्रवसंयुतत्वम्**।

एतादृशस्यापि साक्षात् न पेयत्वम् अस्ति - इति , **रसत्वम्** उक्तम्।

रसत्वेऽपि माधुर्य्यातिशया(/यत्वा)भावे न पेयत्वम् - इति , उभयम् उक्तम् - इति ।

आलयम् - इति ।
लयो = मोक्षः । तम् **अभिव्याप्य** - इत्यर्थः ।

एतत्पानस्यैव मोक्षहेतुत्वात् , अनायासेन मोक्षः सम्पत्स्यते - इति ; **अमृतद्रवसंयुतम्** इत्यत्र सूचितम् ।

एतेन - व्याध्यादिप्रतिबन्धाभावोऽपि - **व्याख्यातः** । जीवन्मुक्तेरनुपपत्तेः ।

ननु कल्पतरुफलं देवभोग्यं कथमस्माभिः लभ्यताम् ।

अत आह - **शुकमुखाद् भुवि गलितम्** - इति ।

अहो - इति अलभ्यलाभोक्तिः ।

शुकेन मुनिना परीक्षिते उपदिष्टं , तत् श्रुत्वा सूतेन शौनकादिभ्यः कथितम् । ततो लोके प्रवृत्तम् - इत्यर्थः ।

निगमो = महानङ्कः ; '**स्थानीयं निगम**' - इति**कोषात्** ।
तस्य यः **कल्पतरुः** = सुरतरुसदृशः उत्तमवृक्षः = आम्रादिः , तस्य **फलं रसं** = परिपक्वतया रसभूयिष्ठम् **अमृतकल्पेन द्रवेण संयुतं भागवतम्** = ऐश्वर्य्यविशेषसम्पन्नस्य महीपतेर्भोग्यं **शुकस्य** = पक्षिणो **मुखात् गलितत्वादेव** दुरापमपि समासादितम् **आलयं** = सौकृत्यविशेषवशात् इन्द्रियाणां लयपर्य्यन्तं कश्चित् सुकृती पिबति । तद्वत् । - इति निगमशुकादिव्यङ्ग्य उपमालङ्कारः ।

रसमा = रससम्पत् , तस्या **आलयम्** - इति **रसमालयम्** - इत्येकं **वा** पदम् ।

निर्गलितास्तु हे **रसिकाः भावकाः भागवतं** = भगवद्विषयं **रसं** = भगवद्भक्त्याख्यं **पिबत** = आस्वादयत **आलयं** = मनोलयपर्य्यन्तं ; भगवद्भक्तिरसस्य मनोलयहेतुत्वात् ।

तस्य परमदुर्लभत्वम् आह - **फलम्** - इति ।
सर्व्वसुकृतकर्म्मफलभूतम् । तथा च **वक्ष्यति** –

दानव्रततपोहोमजपस्वाध्यायसंयमैः ।
श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥

- इति ।

एतादृशस्यापि प्राप्तौ दृष्टोपायमाह –
निगमकल्पपतरोः ।

निगमो = भागवताख्यः पञ्चमो वेदः । **स एव कल्पतरुः** , अनेकस्कन्धशोभितत्वात् ।
तस्मात् **गलितं** = भागवतात्मना महाकाव्येन व्यञ्जितम् - इत्यर्थः ।

वृक्षस्य केनचिद् द्वारेणैव रसव्यञ्जकत्वं दृष्टम् - इति ; तदर्थं वृक्षं विशिनष्टि - **शुकमुखात्** - इति ।
शुको = बादरायणिः , **मुखं** = द्वारं यस्य ; तस्मात् **निगमकल्पतरोः** ।
शुकपरीक्षित्संवादरूपसम्प्रदायप्रवृत्तिम् अन्तरेण तत्र रसानुभवो न स्यात् - इत्यर्थः ।

पुनः कीदृशेन - **अमृतद्रवसम्** ।
अमृतद्रवो = देवभोग्यो रसो , मोक्षगतिः च । तं **स्यति** = खण्डयति = निकृष्टताम् आपादयति - इति ; तथा । भक्तिरसानुभवे स्वर्गमोक्षयोः वाञ्छानुदयात् ।
तथा च ध्रुवो **वक्ष्यति** –

या निवृत्तिस्तनुभृतां तव पादपद्म –
ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्
किम्वन्तकासिलुलितात् पततां विमानात् ॥

न नाकपृष्ठं न च सार्व्वभौमं
न पारमेष्ठ्यं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा
वाञ्छन्ति यत्पादरजःप्रपन्नाः ॥

- इति च नागपत्नीवचनम् ।

एतादृशं कथमस्माभिः लभ्यताम् ।

अत आह - **भुवि युतम्** ।
अहो - इति भाग्यातिशयोक्तिः ।

अत्र च भक्तिरसानुभवासाधारणकारणत्वेन , भागवतस्य रसतादात्मम्यविवक्षया ; सामानाधिकरण्यम् ।
रसस्य तत्तादात्म्येन , भागवताख्यं पुराणम् अपि परमः पुमर्थ - इति तत्र प्रवृत्तये न पृथक् यतितव्यम् - इति अभिप्रायः ॥३॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य्यविश्वेश्वरसरसवतीपूज्यपादशिष्यश्रीमन्मधुसूदनसरस्वतीकृता श्रीमद्भागवतप्रथमस्कन्धस्य आद्यपद्यत्रयव्याख्या सम्पूर्णा ॥

॥ हरिः ॐ तत् सत् ॥